Baglamukhi Kavach In Hindi and English

Shri Yogeshwaranand Ji

+919917325788, +919675778193

shaktisadhna@yahoo.com

www.anusthanokarehasya.com

www.baglamukhi.info

मां बगलामुखी के प्रत्येक साधक को प्रतिदिन जाप प्रारम्भ करने से पहले इस कवच का पाठ अवश्य करना चाहिए। यदि हो सके तो सुबह दोपहर शाम तीनों समय इसका पाठ करें। यह कवच विश्वसारोद्धार तन्त्र से लिया गया है। पार्वती जी के द्वारा भगवान शिव से पूछे जाने पर भगवती बगला के कवच के विषय में प्रभु वर्णन करते हैं कि देवी बगला शत्रुओं के कुल के लिये जंगल में लगी अग्नि के समान हैं। वे साम्रज्य देने वाली और मुक्ति प्रदान करने वाली हैं।

भगवती बगलामुखी के इस कवच के विषय में बहुत कुछ कहा गया है। इस कवच के पाठ से अपुत्र को धीर, वीर और शतायुष पुत्र की प्राप्ति होति है और निर्धन को धन प्राप्त होता है। महानिशा में इस कवच का पाठ करने से सात दिन में ही असाध्य कार्य भी सिद्ध हो जाते हैं। तीन रातों को पाठ करने से ही वशीकरण सिद्ध हो जाता है। मक्खन को इस कवच से अभिमन्त्रित करके यदि बन्धया स्त्री को खिलाया जाये, तो वह पुत्रवती हो जाती है। इसके पाठ व नित्य पूजन से मनुष्य बृहस्पति के समान हो जाता है, नारी समूह में साधक कामदेव के समान व शत्रओं के लिये यम के समान हो जाता है। मां बगला के प्रसाद से उसकी वाणी गद्य-पद्यमयी हो जाती है। उसके गले से कविता लहरी का प्रवाह होने लगता है। इस कवच का पुरश्चरण एक सौ ग्यारह पाठ करने से होता है, बिना पुरश्चरण के इसका उतना फल प्राप्त नहीं होता। इस कवच को भोजपत्र पर अष्टगंध से लिखकर पुरुष को दाहिने हाथ में व स्त्री को बायें हाथ में धारण करना चाहिये।

ध्यान

सौवर्णासनसंस्थितां त्रिनयनां पीताशुकोल्लासिनीम्।
हेमाभांगरुचिं शशांकमुकुटां सच्चम्पकस्रग्युताम् ॥
हस्तैर्मुदगर पाशवज्ररसनाः संबिभ्रतीं भूषणैः।

व्याप्तागीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिन्तयेत्।।

विनियोगः

ॐ अस्य श्रीबगलामुखीब्रह्मास्त्रमन्त्रकवचस्य भैरव ऋषिः, विराट् छन्दः श्रीबगलामुखी देवता, क्लीं बीजम्, ऐं शक्तिः, श्रीं कीलकं, मम परस्य च मनोभिलाषितेष्टकार्यसिद्धये विनियोगः ।

ऋषि-न्यास

शिरसि भैरव ऋषये नमः ।
मुखे विराट छन्दसे नमः ।
हृदि बगलामुखीदेवतायै नमः ।
गुह्ये क्लीं बीजाय नमः ।
पादयो ऐं शक्तये नमः ।
सर्वांगे श्रीं कीलकाय नमः ।

करन्यास

ॐ ह्लां अंगुष्ठाभ्यां नमः ।
ॐ ह्लीं तर्जनीभ्यां नमः ।
ॐ ह्लूं मध्यमाभ्यां नमः ।
ॐ ह्लैं अनामिकाभ्यां नमः ।
ॐ ह्लौं कनिष्ठिकाभ्यां नमः ।
ॐ ह्लः करतलकरपृष्ठाभ्यां नमः ।

हृदयादि न्यास

ॐ ह्लां हृदयाय नमः ।
ॐ ह्लीं शिरसे स्वाहा ।
ॐ ह्लूं शिखायै वषट् ।
ॐ ह्लैं कवचाय हुम ।
ॐ ह्लौं नेत्रत्रयाय वौषट् ।
ॐ ह्लः अस्त्राय फट् ।

मन्त्रोद्धारः

ॐ ह्लीं ऐं श्रीं क्लीं श्रीबगलानने मम रिपून् नाशय नाशय मामैश्वर्याणि देहि देहि, शीघ्रं मनोवाञ्छितं कार्यं साधय साधय ह्लीं स्वाहा।

कवच

शिरो मे पातु ॐ ह्लीं ऐं श्रीं क्लीं पातु ललाटकम् ।
सम्बोधनपदं पातु नेत्रे श्री बगलानने ।।1।।
श्रुतौ मम् रिपुं पातु नासिकां नाशयद्वयम् ।
पातु गण्डौ सदा मामैश्वर्याण्यन्तं तु मस्तकम् ।।2।।
देहि द्वन्द्वं सदा जिहवां पातु शीघ्रं वचो मम ।
कण्ठदेशं मनः पातु वाञ्छितं बाहुमूलकम् ।।3।।
कार्यं साधयद्वन्द्वं तु करौ पातु सदा मम ।
मायायुक्ता यथा स्वाहा हृदयं पातु सर्वदा ।।4।।
अष्टाधिकचत्वारिंशदण्डाढया बगलामुखी ।
रक्षां करोतु सर्वत्र गृहेऽरण्ये सदा मम ।।5।।
ब्रह्मास्त्राख्यो मनुः पातु सर्वांगे सर्वसन्धिषु ।
मन्त्रराजः सदा रक्षां करोतु मम सर्वदा ।।6।।
ॐ ह्लीं पातु नाभिदेशं कटिं मे बगलाऽवतु ।
मुखिवर्णद्वयं पातु लिगं मे मुष्कयुग्मकम् ।।7।।
जानुनी सर्वदुष्टानां पातु मे वर्णपञ्चकम् ।
वाचं मुखं तथा पादं षड्वर्णाः परमेश्वरी ।।8।।
जंघायुग्मे सदापातु बगला रिपुमोहिनी ।
स्तम्भयेति पदं पृष्ठं पातु वर्णत्रय मम ।।9।।
जिहवावर्णद्वयं पातु गुल्फौ मे कीलयेति च ।
पादोर्ध्वं सर्वदा पातु बुद्धिं पादतले मम ।।10।।
विनाशयपदं पातु पादांगुल्योंनखानि मे ।
ह्लीं बीजं सर्वदा पातु बुद्धिन्द्रियवचांसि मे ।।11।।
सर्वांगं प्रणवः पातु स्वाहा रोमाणि मेऽवतु ।
ब्राह्मी पूर्वदले पातु चाग्नेय्यां विष्णुवल्लभा ।।12।।
माहेशी दक्षिणे पातु चामुण्डा राक्षसेऽवतु ।
कौमारी पश्चिमे पातु वायव्ये चापराजिता ।।13।।
वाराही च उत्तरे पातु नारसिंही शिवेऽवतु ।
ऊर्ध्वं पातु महालक्ष्मीः पाताले शारदाऽवतु ।।14।।
इत्यष्टौ शक्तयः पान्तु सायुधाश्च सवाहनाः ।
राजद्वारे महादुर्गे पातु मां गणनायकः ।।15।।
श्मशाने जलमध्ये च भैरवश्च सदाऽवतु ।

द्विभुजा रक्तवसनाः सर्वाभरणभूषिताः ।।16।।
योगिन्यः सर्वदा पान्तु महारण्ये सदा मम ।

फलश्रुति

इति ते कथितं देवि कवचं परमाद्भुतम् ।।17।।
श्रीविश्वविजयं नाम कीर्तिश्रीविजयप्रदाम् ।
अपुत्रो लभते पुत्रं धीरं शूरं शतायुषम् ।।18।।
निर्धनो धनमाप्नोति कवचास्यास्य पाठतः ।
जपित्वा मन्त्रराजं तु ध्यात्वा श्री बगलामुखीम् ।।19।।
पठेदिदं हि कवचं निशायां नियमात् तु यः ।
यद् यत् कामयते कामं साध्यासाध्ये महीतले ।।20।।
तत् तत् काममवाप्नोति सप्तरात्रेण शंकरि ।
गुरुं ध्यात्वा सुरां पीत्वा रात्रो शक्तिसमन्वितः ।।21।।
कवचं यः पठेद् देवि तस्यासाध्यं न किञ्चन ।
यं ध्यात्वा प्रजपेन्मन्त्रं सहस्त्रं कवचं पठेत् ।।22।।
त्रिरात्रेण वशं याति मृत्योः तन्नात्र संशयः ।
लिखित्वा प्रतिमां शत्रोः सतालेन हरिद्रया ।।23।।
लिखित्वा हृदि तन्नाम तं ध्यात्वा प्रजपेन् मनुम् ।
एकविंशददिनं यावत् प्रत्यहं च सहस्त्रकम् ।।24।।
जपत्वा पठेत् तु कवचं चतुर्विंशतिवारकम्।
संस्तम्भं जायते शत्रोर्नात्र कार्या विचारणा।।25।।
विवादे विजयं तस्य संग्रामे जयमाप्नुयात् ।
श्मशाने च भयं नास्ति कवचस्य प्रभावतः ।।26।।
नवनीतं चाभिमन्त्रय स्त्रीणां दद्यान्महेश्वरि ।
वन्ध्यायां जायते पुत्रो विद्याबलसमन्वितः ।।27।।
श्मशानांगारमादाय भौमे रात्रौ शनावथ ।
पादोदकेन स्पृष्ट्वा च लिखेत् लोहशलाकया ।।28।।
भूमौ शत्रोः स्वरुपं च हृदि नाम समालिखेत् ।
हस्तं तद्धृदये दत्वा कवचं तिथिवारकम् ।।29।।
ध्यात्वा जपेन् मन्त्रराजं नवरात्रं प्रयत्नतः ।
म्रियते ज्वरदाहेन दशमेंऽहनि न संशयः ।।30।।
भूर्जपत्रेष्विदं स्तोत्रमष्टगन्धेन संलिखेत् ।
धारयेद् दक्षिणे बाहौ नारी वामभुजे तथा ।।31।।

संग्रामे जयमप्नोति नारी पुत्रवती भवेत् ।
सम्पूज्य कवचं नित्यं पूजायाः फलमालभेत् ।।32।।
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तं जनम् ।
वृहस्पतिसमो वापि विभवे धनदोपमः ।।33।।
कामतुल्यश्च नारीणां शत्रूणां च यमोपमः ।
कवितालहरी तस्य भवेद् गंगाप्रवाहवत् ।।34।।
गद्यपद्यमयी वाणी भवेद् देवी प्रसादतः ।
एकादशशतं यावत् पुरश्चरणमुच्यते ।।35।।
पुरश्चर्याविहीनं तु न चेदं फलदायकम् ।
न देयं परशिष्येभ्यो दुष्टेभ्यश्च विशेषतः ।।36।।
देयं शिष्याय भक्ताय पञ्चत्वं चान्यथाऽऽप्नुयात् ।
इदं कवचमज्ञात्वा भजेद् यो बगलामुखीम् ।।37।।
शतकोटिं जपित्वा तु तस्य सिद्धिर्न जायते ।
दाराढयो मनुजोऽस्य लक्षजपतः प्राप्नोति सिद्धिं परां ।।38।।
विद्यां श्रीविजयं तथा सुनियतं धीरं च वीरं वरम् ।
ब्रह्मास्त्राख्यमनुं विलिख्य नितरां भूर्जेऽष्टगन्धेन वै ।।39।।
धृत्वा राजपुरं व्रजन्ति खलु ते दासोऽस्ति तेषां नृपः ।

इति श्रीविश्वसारोद्धारतन्त्रे पार्वतीश्वरसंवादे
बगलामुखी कवचम्
सम्पूर्णम्

Baglamukhi Kavach In English

Dhyāna

sauvarṇāsanasaṃsthitāṃ trinayanāṃ pītāśukollāsinīm
hemābhāṃgaruciṃ śaśāṃkamukuṭāṃ saccampakasragyutām
hastairmudagara pāśavajrarasanāḥ saṃbibhratīṃ bhūṣaṇaiḥ
vyāptāgīṃ bagalāmukhīṃ trijagatāṃ saṃstambhinīṃ cintayet

viniyogaḥ

om asya śrībagalāmukhībrahmāstramantrakavacasya bhairava ṛṣiḥ, virāṭ chandaḥ śrībagalāmukhī devatā, klīṃ bījam, aiṃ śaktiḥ, śrīṃ kīlakaṃ, mama parasya ca manobhilāṣiteṣṭakāryasiddhaye viniyogaḥ

nyāsa

śirasi bhairava ṛṣaye namaḥ

mukhe virāṭa chandase namaḥ

hṛdi bagalāmukhīdevatāyai namaḥ

guhye klīṃ bījāya namaḥ

pādayo aiṃ śaktaye namaḥ

sarvāṃge śrīṃ kīlakāya namaḥ

om hrāṃ aṃguṣṭhābhyāṃ namaḥ

om hrīṃ tarjanībhyāṃ namaḥ

om hrūṃ madhyamābhyāṃ namaḥ

om hraiṃ anāmikābhyāṃ namaḥ

om hrauṃ kaniṣṭhikābhyāṃ namaḥ

om hraḥ karatalakarapṛṣṭhābhyāṃ namaḥ

om hrāṃ hṛdayāya namaḥ

om hrīṃ śirase svāhā

om hrūṃ śikhāyai vaṣaṭ

om hraiṃ kavacāya huma

om hrauṃ netratrayāya vauṣaṭ

om hraḥ astrāya phaṭ

mantroddhāraḥ

om hrīṃ aiṃ śrīṃ klīṃ śrībagalānane mama ripūn nāśaya nāśaya māmaiśvaryāṇi dehi dehi, śīghraṃ manovāñchitaṃ kāryaṃ sādhaya sādhaya hrīṃ svāhā.

kavaca

śiro me pātu om hrīṃ aiṃ śrīṃ klīṃ pātu lalāṭakam ।
sambodhanapadaṃ pātu netre śrī bagalānane ॥1॥
śrutau mam ripuṃ pātu nāsikāṃ nāśayadvayam ।
pātu gaṇḍau sadā māmaiśvaryāṇyantaṃ tu mastakam ॥2॥
dehi dvandvaṃ sadā jihavāṃ pātu śīghraṃ vaco mama ।
kaṇṭhadeśaṃ manaḥ pātu vāñchitaṃ bāhumūlakam ॥3॥
kāryaṃ sādhayadvandvaṃ tu karau pātu sadā mama ।
māyāyuktā yathā svāhā hṛdayaṃ pātu sarvadā ॥4॥
aṣṭādhika-catvāriṃśa-daṇḍāḍhayā bagalāmukhī ।
rakṣāṃ karotu sarvatra gṛheऽraṇye sadā mama ॥5॥
brahmāstrākhyo manuḥ pātu sarvāṃge sarvasandhiṣu ।
mantrarājaḥ sadā rakṣāṃ karotu mama sarvadā ॥6॥
om hrīṃ pātu nābhideśaṃ kaṭiṃ me bagalā-avatu ।
mukhi-varṇadvayaṃ pātu ligaṃ me muṣka-yugmakam ॥7॥
jānunī sarva-duṣṭānāṃ pātu me varṇa-pañcakam ।
vācaṃ mukhaṃ tathā pādaṃ ṣaḍvarṇāḥ parameśvarī ॥8॥
jaṃghāyugme sadāpātu bagalā ripumohinī ।
stambhayeti padaṃ pṛṣṭhaṃ pātu varṇatraya mama ॥9॥
jihavā-varṇadvayaṃ pātu gulphau me kīlayeti ca ।

pādordhvaṃ sarvadā pātu buddhiṃ pādatale mama ॥10॥

vināśayapadaṃ pātu pādāṃgurlyonakhāni me ।

hrīṃ bījaṃ sarvadā pātu buddhindriyavacāṃsi me ॥11॥

sarvāgaṃ praṇavaḥ pātu svāhā romāṇi me-avatu ।

brāhmī pūrvadale pātu cāgneyyāṃ viṣṇuvallabhā ॥12॥

māheśī dakṣiṇe pātu cāmuṇḍā rākṣase-avatu ।

kaumārī paścime pātu vāyavye cāparājitā ॥13॥

vārāhī ca uttare pātu nārasiṃhī śive-avatu ।

ūrdhvaṃ pātu mahālakṣmīḥ pātāle śāradā-avatu ॥14॥

ityaṣṭau śaktayaḥ pāntu sāyudhāśca savāhanāḥ ।

rājadvāre mahādurge pātu māṃ gaṇanāyakaḥ ॥15॥

śmaśāne jalamadhye ca bhairavaśca sadā-avatu ।

dvibhujā raktavasanāḥ sarvābharaṇabhūṣitāḥ ॥16॥

yoginyaḥ sarvadā pāntu mahāraṇye sadā mama ।

phalaśruti

iti te kathitaṃ devi kavacaṃ paramādbhutam ॥17॥

śrīviśvavijayaṃ nāma kīrtiśrīvijayapradām ।

aputro labhate putraṃ dhīraṃ śūraṃ śatāyuṣam ॥18॥

nirdhano dhanamāpnoti kavacāsyāsya pāṭhataḥ ।

japitvā mantrarājaṃ tu dhyātvā śrī bagalāmukhīm ॥19॥

paṭhedidaṃ hi kavacaṃ niśāyāṃ niyamāt tu yaḥ ।

yad yat kāmayate kāmaṃ sādhyāsādhye mahītale ॥20॥

tat tat kāmamavāpnoti saptarātreṇa śaṃkari ।

guruṃ dhyātvā surāṃ pītvā rātro śaktisamanvitaḥ ॥21॥

kavacaṃ yaḥ paṭhed devi tasyāsādhyaṃ na kiñcana ।
yaṃ dhyātvā prajapenmantraṃ sahastraṃ kavacaṃ paṭhet ॥22॥
trirātreṇa vaśaṃ yāti mṛtyoḥ tannātra saṃśayaḥ ।
likhitvā pratimāṃ śatroḥ satālena haridrayā ॥23॥
likhitvā hṛdi tannāma taṃ dhyātvā prajapen manum ।
ekaviṃśadadinaṃ yāvat pratyahaṃ ca sahastrakam ॥24॥
japatvā paṭhet tu kavacaṃ caturviṃśativārakam ।
saṃstambhaṃ jāyate śatrornātra kāryā vicāraṇ ॥25॥
vivāde vijayaṃ tasya saṃgrāme jayamāpnuyāt ।
śmaśāne ca bhayaṃ nāsti kavacasya prabhāvataḥ ॥26॥
navanītaṃ cābhimantraya strīṇāṃ dadyānmaheśrvari ।
vandhyāyāṃ jāyate putro vidyābalasamanvitaḥ ॥27॥
śmaśānāṃgāramādāya bhaume rātrau śanāvatha ।
pādodakena spṛṣṭvā ca likhet lohaśalākayā ॥28॥
bhūmau śatroḥ svarupaṃ ca hṛdi nāma samālikhet ।
hastaṃ taddhṛdaye datvā kavacaṃ tithivārakam ॥29॥
dhyātvā japen mantrarājaṃ navarātraṃ prayatnataḥ ।
mriyate jvaradāhena daśameṃऽhani na saṃśayaḥ ॥30॥
bhūrjapatreṣvidaṃ stotramaṣṭagandhena saṃlikhet ।
dhārayed dakṣiṇe bāhau nārī vāmabhuje tathā ॥31॥
saṃgrāme jayamapnoti nārī putravatī bhavet ।
sampūjya kavacaṃ nityaṃ pūjāyāḥ phalamālabhet ॥32॥
brahmāstrādīni śastrāṇi naiva kṛntanti taṃ janam ।
vṛhaspatisamo vāpi vibhave dhanadopamaḥ ॥33॥

kāmatulyaśca nārīṇāṃ śatrūṇāṃ ca yamopamaḥ ।

kavitālaharī tasya bhaved gaṃgāpravāhavat ॥34॥

gadyapadyamayī vāṇī bhaved devī prasādataḥ ।

ekādaśaśataṃ yāvat puraścaraṇamucyate ॥35॥

puraścaryāvihīnaṃ tu na cedaṃ phaladāyakam ।

na deyaṃ paraśiṣyebhyo duṣṭebhyaśca viśeṣataḥ ॥36॥

deyaṃ śiṣyāya bhaktāya pañcatvaṃ cānyathā-aapnuyāt ।

idaṃ kavacamajñātvā bhajed yo bagalāmukhīm ॥37॥

śatakoṭiṃ japitvā tu tasya siddhirna jāyate ।

dārāḍhayo manujoasya lakṣajapataḥ prāpnoti siddhiṃ parāṃ ॥38॥

vidyāṃ śrīvijayaṃ tathā suniyataṃ dhīraṃ ca vīraṃ varam ।

brahmāstrākhyamanuṃ vilikhya nitarāṃ bhūrje-aṣṭagandhena vai 39

dhṛtvā rājapuraṃ vrajanti khalu te dāsoasti teṣāṃ nṛpaḥ

iti śrīviśvasāroddhāratantre pārvatīśvarasaṃvāde

bagalāmukhī kavacam

sampūrṇam

Shri Yogeshwaranand Ji

Mb :- +919917325788, +919675778193
Email :- shaktisadhna@yahoo.com
Web : www.anusthanokarehasya.com
www.baglamukhi.info

My dear readers! Very soon I am going to start an E-mail based monthly magazine related to tantras, mantras and yantras including practical uses for human welfare. I request you to appreciate me, so that I can change my

dreams into reality regarding the service of humanity through blessings of our saints and through the grace of Ma Pitambara. Please make registered to yourself and your friends. For registration email me at shaktisadhna@yahoo.com. Thanks

For Purchasing all the books written By Shri Yogeshwaranand Ji Please Contact 9410030994

1. Mahavidya Shri Baglamukhi Sadhana Aur Siddhi

2. **Mantra Sadhana**

3. **Shodashi Mahavidya** (Tripursundari Sadhana)